उवाच सात्वतः सत्वसंपन्नः सुजज्ञे सुतान् अन्धकं भजमानं च दिव्यं देवावृधं नृपं श्रेष्ठं च महाभागाद्
वृष्णिं च यदुनंदनः तेषां निसर्गाश्चत्वारः सुतास्ते विस्तरेण वै भजमानस्य सृंजय्यां भजमानौ विजज्ञिरे सुषुवातेपुः
सहस्राजुत्वेलवान्नंदेपाकः पारः तस्याद्देवावृधो राजा चचार परमं तपः पुत्रः सर्वगुणोपेतो मम भूयादिति स्पृ
हा जातो बभ्रुरिति ख्यातः पुराणश्लोकोत्तमः पुरुषाः पंचषष्टिश्च षट्सहस्राणि चाष्टकः येऽमृतत्वम
नुप्राप्ता बभ्रोर्देवावृधादिति यज्वा दानपतिर्वीरो ब्रह्मण्यस्तु दृढायुधः कीर्तिमांश्च महातेजाः सात्वतानां म
हारथः तस्यान्वये च संभूता भोजा वै देवतोपमाः गान्धारी चैव माद्री च वृष्णिभार्ये बभूवतुः गान्धारी जनयामास
सुमित्रं मित्रनंदनं माद्री युधाजितं पुत्रं ततस्तं देवमीढुषं अनमित्रं ततश्चैव सहनः पुत्रोत्तमः अनमित्रसु
तो निघ्नो निघ्नस्य द्वौ बभूवतुः प्रसेनश्च महाभागः सत्राजिच्च सुतावुभौ तस्य सत्राजितः स्वामी सूर्यः प्राण
समः सखा स्यमंतकं ददौ तस्मै सत्राजितेन चक्रुर्मणि कदाचिन्मृगयां यातः स हतस्तेन प्रसेनजित् वध्यः स्वामो
सह्यश्वसिंहादवसद्दाहणात् अनमित्रात्मशिनिजेक निष्ठो हस्मिनंदनात् सपत्नापरमा नामासीद्देवदेवाज
नार्दनः हलायुधश्च भगवान्येनेतोस्यजितः प्रभुः भृगुशापच्छलेनैव मानयन्मानुषीं प्रभुः बभूव तस्याद्देवक्यां
वसुदेवो जनार्दनं उमादेहसमुद्भूता कौशिकी योगनिद्रया नियोगाद्देवदेवस्य यशोदातनया समभूत्।

63

११

निमितेर्वीतिहोत्रस्तायप्रियमन्नमो अश्वमेधेष्वधर्मोन्नृपात्मजविनयः पृथिवीं ददौ दक्षिणां रुक्मकवचात्परावृत्प।
रवीरहा जज्ञिरे पञ्चपुत्रास्तुमहावीर्याः परावृतः रुक्मेषुःपृथुरुक्मश्चज्यामघःपालितोहरिः पालितंचहरिंचैव।
विदेहेषुपितान्वमन्यत रुक्मेषुरभवद्राजापृथुरुक्मस्तदाश्रयात् तेभ्यः प्रव्राजितोराज्याज्ज्यामघोऽवसदाश्रमे
प्रशान्तःसवनस्थोऽपिब्राह्मणैश्चावबोधितः जगामरथमास्थायदेशमन्यंध्वजीरथी नर्मदाकूलमेकाकीमेक।
लांमृत्तिकावतीं ऋक्षवन्तंगिरिंगत्वाशुक्तिमत्यामवासयत् ज्यामघस्याभवद्भार्याशैब्याबलवतीसती माचे
वतपसोग्रेणशैब्यावैसमसूयत पुत्रंविदर्भंराजन्जज्ञे शूरौरणविशारदौ रोमपादस्तृतीयस्तुबभ्रुस्तस्यात्मजो
सुतात्मजःधृतिः अप्रतितनयास्तस्याद्विजाःपरमधार्मिकाः कौशिकस्यसुतश्चेदिश्चैद्यानृपाःस्मृताः
क्रथोविदर्भस्यसुतः कुन्तिस्तस्यात्मजोऽभवत् कुन्तेर्धृष्टसुतोजज्ञे रणधृष्टःप्रतापवान् रणधृष्टःसुतोजज्ञे
निर्वृतिःपरवीरहा दशार्होनैर्वृतोनाम्नामहारिगणसूदनः दशार्हस्यसुतोव्योमाव्योमाज्जीमूतउच्यते
जीमूतात्विकृतिस्तस्यसुतोभीमरथःस्मृतः अथभीमरथस्यासीत्सुतोनवरथःकिल दानधर्मरतोनित्यंस
त्यशीलपरायणः तस्यचासीद्दृढरथःशकुनिस्तस्यचात्मजः तस्मात्करम्भःसम्भूतोदेवरातोऽभवत्तदा देव
रातोऽभवद्राजादेवगर्भोमहायशाः देवगर्भसमोजज्ञे मधुस्तस्मादजायत मधोस्तुवंशजःकान्तःप्रख्या
नःपुरुद्वत्सःप्रभुः आसीत्पुरुद्वत्सस्यतमगीणीपुरुद्वात्तमः जज्ञेत्वमगीणीदेहात्कृष्णायोचकृतरेनःऐक्ष्वाकी
ह्यभवद्भार्याततस्तस्मात्तस्यांतरेनात् सत्ववान्गुणसम्पन्नःसात्वतःकुलवर्द्धनः पुरुद्वत्सःसत्ववानसत्तरेनःम

64

श्री·
लिं·पु·
५
११२

65

हस्तथैव च जयध्वजस्तु राजाभूदवंतीनां विशांपतिः जयध्वजस्य पुत्रोभूत्तालजंघोमहाबलः संहतास्तालजंघ
स्तालजंघा इतिस्मृताः तेषांज्येष्ठोमहावीर्यो वीतिहोत्रोभवन्नृपः वृषप्रभृतयश्चान्ये यादवाःपुण्यकर्म
णः वृषोवंशकरस्तेषांतस्यपुत्रोभवन्मधुः मधोःपुत्रशतंत्वासीद्वृषणस्तस्यवंशभाक वृषणाद्वृष्णयःस
र्वेमधोर्वैमाधवाःस्मृताः यादवायदुवंशेननिरुच्यंतेचहैहयाः तेषांपंचगणाःख्यातहैहयानांमहात्मनां
वीतिहोत्राश्चभोजाश्चअवंत्यस्तथैवच तुंडिकेराश्चविक्रांतास्तालजंघास्तथैवच शूरश्चशूरवीरश्च शू
रसेनश्चवानवः शूरसेनाइतिख्याताः देशास्तेषांमहात्मनां वीतिहोत्रसुतश्चापिविश्रुतोनंतइत्युत
दुर्जयस्तस्यपुत्रस्तुबभूवामित्रकर्षणः क्रोष्टोस्तुशृणुराजेन्द्रवंशमुत्तमपौरुषं यस्यान्ववायसंभूतो
विष्णुर्वृष्णिकुलोद्वहः क्रोष्टोरेकोभवत्पुत्रोवृजिनीवान्महायशाः तस्यपुत्रोभवद्राजात्रिशांकुर्वदतांवरः
त्रिशांकोर्ऋषभःपुत्रःऋषभोस्त्वात्मकः महाक्रतुभिरीजेसौविविधैराप्तदक्षिणैः लेभेचित्ररथंपुत्र
चित्रकर्माभिरन्वितं अथचैत्ररथिर्वीरोयज्वाविपुलदक्षिणः शशबिंदुःसवैराजाअन्वयाद्व्रतमुत्तमं च
क्रवर्तीमहासत्वोमहावीर्योमहाप्रभः शशबिंदोस्तुपुत्राणांसहस्राणामभूच्छतं शंसंतीहपुत्राणांस्ता
स्तस्यात्मजमनंतकं अनंतकात्मजस्तस्ययज्ञस्यतनयोधृतिः उशनास्तस्यसंप्राप्यसमहीमिमां आजहा
राश्वमेधानांशतमुत्तमधार्मिकः स्मृतश्चोशनसःपुत्रः पुत्राद्धिजितपार्थिवाः मरुत्तस्यतनयोराजर्षि
वंशवर्द्धनः वीरःकंबलबर्हिषोमरुत्तस्तनयःस्मृतः पुत्रस्तुरुक्मकवचोविद्वान्काववित्रोरणे यत्विनो

यत्नस्य

जीर्यंतिजीर्यतः चक्षुःश्रोत्रे च जीर्येते तृष्णैकानिरुपद्रवा जीर्यंति देहिनः सर्वे स्वभावादेव नान्यथा जीवि
ताशाधनाशा च जीर्यतोपि न जीर्यतः यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं तृष्णाक्षयसुखस्यैव कला
नार्हति षोडशीं एवमुक्त्वा स राजर्षिः सदारः प्राविशद्वनं भृगुतुंगे तपः कृत्वा तत्रैव च महायशाः सायुज्यवा
ननगात्स सदारः स्वर्गमास्थवान् तस्य वंशाश्च पंचैते पुण्या देवर्षिसत्कृताः यैर्व्याप्ता पृथिवी कृत्स्ना सूर्यस्ये
व मरीचिभिः यतेः प्रजानां नायुष्मान् कीर्तिमांश्च भवेन्नरः ययातिचरितं पुण्यं पठंश्च शृण्वन्सद्विजमान् इति श्री
महापुराणे लैंगे सोमवंशे ययातिचरिते षट्षष्टितमोध्यायः ६६ सूत उवाच यदोर्वंशं प्रवक्ष्यामि ज्येष्ठ
स्योत्तमतेजसः संक्षेपेणानुपूर्व्या च गदितो मे निबोधत यदोः पुत्रा बभूवुर्हि पंच देवसुतोपमाः सहस्राजि
त्सवेजित्क्रोष्टुर्नीलोंशजिल्लघुः सहस्राजितस्तु दायादः शतजिन्नाम विश्रुतः सुताः शतजितः ख्याता स्त्र
यः परमकीर्तयः हैहयश्च हयश्चैव राजा वेणुहयश्च यः हैहयस्य तु दायादो धर्मनेत्र इति श्रुतः धर्मनेत्रस्य
कुंतिस्तु संहितस्तस्य चात्मजः संहितस्य तु दायादो महिष्मान्नाम पार्थिवः आसीन्महिष्मतः पुत्रो भद्र
श्रेण्यः प्रतापवान् भद्रश्रेण्यस्य दायादो दुर्दमो नाम पार्थिवः दुर्दमस्य सुतो धीमान्कनको नाम पार्थिवः कनक
स्य तु दायादाश्चत्वारो लोकसंमताः कृतवीर्यः कृताग्निश्च कृतवर्मा तथैव च कृतौजाश्च चतुर्थोभूत्कार्त
वीर्यस्ततोर्जुनः जज्ञे बाहुसहस्रेण सप्तद्वीपेश्वरः प्रभुः तस्य रामस्तदा चासीन्मृत्युर्नारायणांशजः तस्य
पुत्रशतान्यासन् पंच तत्र महारथाः कृतास्त्रा बलिनः शूराः धर्मात्मानो मनस्विनः शूरश्च शूरसेनश्च धृष्टःक्रो

नामभृणं घोरामवक्तव्यं बाल्यं मातिनिष्कृतिविशेषतः कनीयान्मम राज्यार्हो जरा येन धृता मम शुक्रेणामे समा
दिष्टा देवयान्याः कृते जरा पार्थिवेन पुनस्तेन जरा सा संचारिता भृता शुक्रेण च वरो दत्तः प्रार्थितेन मया स्व
यं पुत्रो यस्त्वानुवर्तेयः स ते राज्यभवेदिति भवन्तः सम्यगुक्तास्तातः पुत्रो ज्येष्ठोभिषिच्यतां प्रकृतय ऊचुः यः पुत्रो
गुणसंपन्नो मातापित्रोर्हितः सदा सर्वमर्हति कल्याणं कनीयानपि स प्रभुः अर्हः पूरुरिदं राज्यं सः यदा
प्रियकृत्तदा वरदानाच्च शुक्रस्य न शक्यं कर्तुमन्यथा सूत उवाच पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्त
दा अभिषिच्य ततः पूरुं स्वे राज्ये महात्मना दिशि दक्षिणपूर्वस्यां तुर्वसुं पुत्रमादिशत् दक्षिणस्यां तु राजा
नायदुं ज्येष्ठं न्ययोजयत् प्रतीच्यामनु राजानं द्रुह्युं चानु स्थिताविभौ सप्तद्वीपां ययातिस्तु जित्वा पृथ्वीं ससागरां
व्यभजत्पंचधा राजा पुत्रेभ्यो नाहुषस्तदा तेषु येषु पृथिवी सर्वा सप्तद्वीपा ससागरा यथाप्रदेशमद्यापि धर्मेण
प्रतिपाल्यते एवं विभज्य पृथिवीं पुत्रेभ्यो नाहुषस्तदा प्रीतिमानभवद्राजा भारमावेश्य बंधुषु पुत्रसं
क्रामितश्रीस्तु हर्षनिर्भरमानसः तेनगाथा महाराजो नाहुषो गीता ययातिना याभिः प्रत्याहरेत्कामान्सर्वे
शोगानि कूर्मवत् सो तिभाति नाराः श्रीमान्यथा कूर्म कोटिभिः न जातु कामः कामानामुपभोगेन शाम्यति
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः एकस्यापि न पर्याप्तमिति म
त्वा शमं व्रजेत् यदा न कुरुते भावं सर्वभूतेषु पापकम् कर्मणा मनसा वाचा ब्रह्म संपद्यते तदा यादुस्त्य
जा दुर्मतिभिर्या न जीर्यति जीर्यतः योसौ प्राणांतिको रोगस्तां तृष्णां त्यजतः सुखं जीर्यंति जीर्यतः केशा दंता

येणाज्ञयन्महीं ययातिर्पृथिवीपतिः पूर्वो देवसतनवमानैवे: अवभक्तः सुपुणापान्मायमैतिश्छोगातुन्लमः यज्ञयाजी
जितक्रोधः सर्वभूतानुकंपकः पौरवाणां सर्वेषां श्रेष्ठोऽभवद्यशस्विनां यावन्नेऽङ्गप्रवरः कौरवो जनमेजयः
कुरोः पुत्रश्च राजन्यस्ततः पार्थोऽस्य सूनुः जनामस्यरथानापाशापाऋषीस्यपाश्चान्तः गांगस्याहितसतेबालेन
राजा जनमेजयः ब्राह्मणं हिंसया ब्रह्महत्यामवाप सः स लोहगन्धी राजर्षिः परिधावन्नितस्ततः पौर
जानपदैस्त्यक्तो न लेभे शर्म कर्हिचित् ततः स दुःखसंतप्तो नालभत् संविदं क्वचित् जगाम शौनकं विप्र
शरणाय व्यथितातिथिः इंद्रोतनाम विख्यातो योऽसौ मुनिरुदारधीः याजयामास चेन्द्रोतः शौनको जनमेजयं
मेजयं अश्वमेधेन राजानं पावनार्थं द्विजोत्तमः स लोहगन्धो व्यपनीय तमश्वमेधमहायशाः तस्माच्चावभृथमा
सायमचरिद्योरथः शुभः तस्मादिन्द्रात्समवाप्तो वसोश्चेदिपतेः पुनः ददौ शक्रेण तं लेभे तस्माद्बृहद्र
थः ततो हत्वा जरासंधं भीमस्तं रथमुत्तमम् प्रददौ वासुदेवाय प्रीत्या कौरवनंदन सूत उवाच अभिषिंचा
तु पुत्रं ययातिर्नाहुषः प्रभुः कनीयसं तेनैव स्वराज्ये ब्राह्मणादिजनस्तदा तं चाभिषेक्तुकामं नृपं पूरुं कनीया
सं ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो ज्येष्ठं पुत्रमतिक्रम्य
कनीयान् राज्यमर्हति ययातिरुवाच ब्राह्मणप्रमुखा वर्णाः सर्वे शृण्वन्तु मे वचः ज्येष्ठं प्रति यथा राज्यं न मे
देयं कथंचन मम ज्येष्ठेन यदुना नियोगो नानुपालितः प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः स पुत्रः
पुत्रवद्यस्तु वर्तते पितृमातृषु यदुनाहमवज्ञातस्तथा तुर्वसुनापि च द्रुह्युणा चानुना चैवमप्यवज्ञा कृ

यस्यमाकन्याभार्यास्मस्यविख्याता ऋषिरत्नंप्रभुःसोऽभवत्तस्यसेनानाममहाबलः भार्गवोयोवरीयश्चविख्य
तःप्रतापवान् कृतस्तस्यसुतःश्रीमान्सर्वधर्मविदांवरः ततःकृतस्यकायार्थप्रथितोऽभवत्ततःप्रथितो
हिंसपिताबहुगोःपापेभ्यःकल्मषंप्रापणात्स्वदत्तमाप्नोतोःश्वेतेनप्रायमःस्यते तस्यपुत्रोऽतिविख्यातोराजासीद्रा
जवाहनः एतेसमासतःप्रोक्तामनुवंशाःमहात्मनाः श्लोकोःपुत्रपौत्रेषुतस्यापिवक्ष्यामिवः सूतउवाच॥
ऐलःपुरूरवानामबभूवभक्तःप्रतापवान् षट्कान्कटकेभ्यःप्रदेशपावतसिद्विजाः उर्वश्यांमनसापुत्राःषट्प्रयागे
प्रोतमनुसमाः प्रतिष्ठानमितिख्यातःसत्त्वेवप्रतिष्ठितः तस्यपुत्राबभूवुर्हिषडिंद्रसमतेजसः ऐलाकव
हिताःसर्वेभवभक्ताःमहाबलाः आयुर्वायुरमावायुर्विश्वायुश्चैववीर्यवान् शतायुश्चश्रुतायुश्चदिव्या
श्चैवोर्वशीसुताः आयुषस्तनयावीराःपंचैवासन्महौजसः स्वर्भानुतनयायांतप्रभायांजज्ञिरेनृपाः न
हुषःप्रथमस्तेषांधर्मज्ञोलोकविश्रुतः नहुषस्यतुदायादाःषडिंद्रसमतेजसः उत्पन्नाःपितृकन्यायांवि
रजायांमहौजसः यतिर्ययातिःसंयातिरायातिश्चनयायकः यतिर्मोदाश्रमाश्रयाद्ब्रह्मभूतोभवत्स्वभः।
तेषांययातिःपंचानांज्येष्ठोराजामहाबलः देवयानीमुशनसःसुतांभार्यामवाप्सः शर्मिष्ठामासुरींचैवतन
यांवृषपर्वणः यदुंचतुर्वसुंचैवदेवयानीव्यजायत तासुतांशुभकर्माणोशुभौविप्राविचेरतुः द्रुह्युंचानुं
चमहेवशर्मिष्ठावार्षपर्वणी अस्त्राणिविरथंतस्मैददौशुक्रःप्रतापवान् तोषितस्तेनविप्रेंद्राःप्रीतःपरमभा
स्वराः असंगंकांचनंदिव्यमत्यश्वमहेषुधी युक्तंमनोजवैरश्वैर्येनकन्यांसमुद्वहन् सतेनरथमुख्येनषड्रा

आसीद्दैलिविलिः श्रीमानदीर्घबाहुः प्रतापवान् पुत्रो विश्वमहत्तस्य पितुः ख्याप्यजायत दिलीपस्तस्य पुत्रोऽभू
त्खट्वाङ्ग इति विश्रुतः येन स्वर्गादिहागत्य मुहूर्तं प्राप्य जीवितं त्रयोऽभिसंधिता लोका बुद्ध्या सत्येन चैव हि दी
र्घबाहुः सुतस्तस्य रघुस्तस्मादजायत अजः पुत्रो रघोश्चापि तस्माज्जज्ञे स वीर्यवान् राजा दशरथो नाम श्रीमा
निक्ष्वाकुवंशकृत् रामो दाशरथिर्वीरो धर्मज्ञो लोकविश्रुतः भरतो लक्ष्मणश्चैव शत्रुघ्नश्चेति वै स्मृताः ते
षां ज्येष्ठो महातेजा रामो राजीवलोचनः रावणं सगणं हत्वा यज्ञैरिष्ट्वा च पार्थिवः एकादश सहस्राणि राज्यं
कृत्वा गमद्दिवं रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः लवश्च सुमहातेजाः सर्वतत्त्वार्थविन्नृपः अति
थिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः नभस्तु पुण्डरीकात् क्षेमधन्वा ततः स्मृतः तस्य पुत्रोऽभवद्वीरो देवानी
कः प्रतापवान् अहीनगुस्तस्य सुतः सहस्राश्वस्ततः परः शुभश्चन्द्रावलोकस्तु तारापीडस्ततोऽभवत् तस्या
त्मजश्चन्द्रगिरिर्भानुमित्रस्ततोऽभवत् श्रुतायुरभवत्तस्मादेते इक्ष्वाकवः स्मृताः भारते यो महातेजाः सोमभद्रे
ण निपातितः एते ह्यैक्ष्वाकवो दायादा राजानः प्रायशः स्मृताः वंशे प्रधाना ये तस्मिन् प्राधान्येन प्रकीर्तिताः
सुवेषाश्रुपतेनानमर्योत्यपरमेश्वरे सप्तमार्थं यथान्यायमिष्टापजे यथाविधि दिवंगतानां महात्मानः के
चिन्मात्रस्योपगतः नवीनाग्रासुराणापेन कुकलाम समागतः प्रष्ठस्तु प्रपृके नत्वाहत्ता पञ्चवीर्यवान्
रणप्रष्ठस्य तेषु नास्य च परमधार्मिकाः आनर्तो नाम शर्यातिः सुकन्या चैव दारिका आनर्तस्याभवत्पुत्रो
रोचमानः प्रतापवान् रोचमानस्य रेवोऽभूद्रेवाद्रैवतपार्थिवः ककुद्मी चापरं नाम ज्येष्ठः पुत्रः शतस्य तु रेवती

वं

२२

श्री॰
लिं॰ पु॰
५९

रुरुकस्तस्य तनयो राजा परमधार्मिकः रुरुकस्य वृकः पुत्रस्तस्माद्बाहुः प्रजज्ञिवान् सगरस्तस्य पुत्रोऽभूद्
राजा परमधार्मिकः द्वे भार्ये सगरस्यापि प्रभा भानुमती तथा ताभ्यामाराधितः पूर्वमौर्वोऽग्निः पुत्रकाम्यया
और्वस्तुष्टस्तयोः प्रादाद्यथेष्टं वरमुत्तमम् एका षष्टिसहस्राणि सुतमेकं तथापरा अगृह्णात्तं वंशकर्त्तारं प्रभा
गृह्णात्सुतान्बहून् एकं भानुमती पुत्रमगृह्णादसमञ्जसं ततः षष्टिसहस्राणि सुषुवे यादवी प्रभा खनन्तः पृ।
थिवीं दग्धा विष्णुना सौम्यमार्गगाः असमञ्जसस्तु तनयः सोंऽशुमान्नाम विश्रुतः तस्य पुत्रो दिलीपस्तु दिलीपा
त्तु भगीरथः येन भागीरथी गंगा तपः कृत्वावतारिता भगीरथस्य तु सुतः श्रुतो नाम बभूव ह नाभागस्त
स्य दायादो भवभक्तः प्रतापवान् अंबरीषः सुतस्तस्य सिंधुद्वीपस्ततोऽभवत् नाभागेनांबरीषेण सिंधुद्वीप
नपालिता प्रबभूवुः प्रजास्तस्य नापृथिव्यां दिवं जिताः आयुतायुः सुतस्तस्य सिंधुद्वीपस्य वीर्यवान् पुत्रोऽयुताय
षोऽभीमान् ऋतुपर्णो महायशाः दिव्याक्षहृदयज्ञोऽसौ राजा नलसखो बली नलो द्वावेव विख्यातौ पुराणे।
दृढव्रतौ वीरसेनसुतश्चान्य ऐक्ष्वाकुकुलोद्भवः ऋतुपर्णस्य पुत्रोऽभूत्सर्वकामो द्विजोत्तमः सुदास।
स्तस्य तनयो राजा त्विंद्रसमोऽभवत् सुदासस्य सुतः प्रोक्तः सौदासो नाम पार्थिवः ख्यातः कल्माषपादो वै।
नाम्ना मित्रसहोऽमिसः वसिष्ठस्तु महातेजाः क्षेत्रे कल्माषपादके अश्मकं जनयामास त्विक्ष्वाकुकुला
द्भवं अश्मकस्योत्कलायां तु मूलकः सुतोऽभवत् स हि रामभयाद्राजा स्त्रीभिः परिवृतोऽचरत् नारीकवचइत्येवं
ततः ख्यातिमथागमत् उत्कलस्यापि धर्मात्मा राजा दशरथः सुतः तस्माद्धेतद्यथा जज्ञे राजा विलीविलो बली

देवासुरविनिर्माणो देवासुरपरायणः देवासुरगुरुर्देवो देवासुरनमस्कृतः देवासुरमहामंत्री देवासुरग
णाश्रयः देवासुरगणाध्यक्षो देवासुरगणाग्रणीः देवातिदेवो देवर्षिर्देवासुरवरप्रदः देवासुरेश्वरो विश्व
देवासुरमहेश्वरः सर्वदेवमयोऽचिंत्यो देवतात्मात्मसंभवः उद्भिदस्त्रिक्रमो वैद्यो वरदो वरजोऽवरः द्वीपी
हस्ती च व्याघ्रो देवः सिंहो नरर्षभः विबुधोऽग्रवरः श्रेष्ठः सर्वदेवोत्तमोत्तमः गुरुः कांतो निजः सर्वः प
वित्रः सर्ववाहनः प्रयुक्तः शोभनो वज्री ईशानः प्रभुरव्ययः शृंगी शृंगप्रियो बभ्रू राजराजो निरामयः अ
भिरामः सुरगणो विरामः सर्वसाधनः ललाटाक्षो विश्वदेहो हरिणो ब्रह्मवर्चसी स्थावराणां पतिश्चैव नि
यमेंद्रियवर्धनः सिद्धार्थः सर्वभूतार्थोऽचिंत्यः सत्यव्रतः शुचिः व्रताधिपः परं ब्रह्म भक्तानां परमा गतिः वि
मुक्तो मुक्ततेजाश्च श्रीमान् श्रीवर्धनो जगत् यथाप्रधानं भगवानिति भक्त्या स्तुतो मया पितावेनमयावाव
श्वपाकैः सहवर्तेय इत्युक्तः सन्निष्क्रांतो नगराद्वनात्पितुः सत्यव्रतो धीमान् श्वपाकावसथांतिके
पित्रा त्यक्तो वसद्वीरः पिता चास्य वनं ययौ सर्वलोकेषु विख्यातस्त्रिशंकुरिति विश्रुतः वसिष्ठकोपात्पापा
त्मा राजा सत्यव्रतः पुरा विश्वामित्रो महातेजास्त्रिशंकुं राजन्नुपशोषयत राज्येऽभिषिच्य तं पित्र्ये याजयामास तं प्रभुः मि
षतां देवतानां च वसिष्ठस्य च कौशिकः सशरीरं तदा तं वै दिवमारोपयत्प्रभुः तस्य सत्यरथा नाम भार्या के
कयवंशजा कुमारं जनयामास हरिश्चंद्रमकल्मषं हरिश्चंद्रस्य च सुतो नामहिस्तुनो भवोपवात् हरितो रोहि
तस्याथ चंचुर्हारीत उच्यते विजयश्च सुदेवश्च चंचुपुत्रौ बभूवतुः जेता क्षत्रस्य सर्वस्य विजयस्तेन संस्मृतः

श्रीः
लिं. पु.
१०८

कः नित्योमायीमहापक्षोदेवासुरपतिःपतिः युक्तश्चयुक्तबाहुश्चदेवोदिविसुपर्वणः आषाढश्चसुषाढश्चध्रु
वोहरिहरः वपुरावर्तमानेभ्योवसुश्रेष्ठोमहापथः शिरोहारीविमर्शश्चसर्वलक्षणभूषितः अ
क्षश्चसर्वयोगीचसर्वकोडोमहाबलः समाम्नायोसमाम्नायःतीर्थदेवोमहातपाःजीवनोविमंत्रभगो।
ऽनिर्योबहुककेशः रत्नप्रभूतोरत्नांगोमहार्णवनिपानवित् मूलेविशालोह्यमृतोव्यक्ताव्यक्तस्तपोनि
धिः आरोहणोधिरोहश्चशीलधारीमहायशाः महाकल्पोमहाकल्पोयोगीयुगकरोहरिः युगरूपोमहारूपो
वनागगहनोवधः न्यायनिर्वचनःपादःपंडितोह्यचलोपमः बहुमालोमहामालःशिमिलीकःसुलोचनः
विस्तारोलवणःकूपःत्रियुगःसफलोदयः त्रिलोचनोविषण्णांगोमणिविद्धोजटाधरः बिंदुर्विसर्गःसुमुखः
शरःसर्वायुधःसहः निवेदनःसुखाजातःसुगंधारोमहाधनुः गिरिशायोविसर्गश्चसर्वलक्षणकालवित् गं
धमालीचभगवाननंतःसर्वकर्मणाः मंथानोबहुलोवायुःसकलःसर्वपावनः तलस्तालीकरस्थाली
ऊर्ध्वसंहननोवहः छत्रच्छत्रोविख्यातोलोकःसर्वाश्रयोक्रमः मुंडोविरूपोविकृतोदंडीकुंडीविकुर्वणः
हर्यक्षःककुभोवज्रीदीप्ततेजाःसहस्रपात् सहस्रमूर्द्धादेवेन्द्रःसर्वदेवमयोगुरुः सहस्रबाहुःसर्वांगःश
रण्यःसर्वलोककृत् कलाकाष्ठालवामात्रामुहूर्तोहःक्षपाक्षणः पवित्रंत्रिमधुर्मंत्रःकनिष्ठःकृष्णपिंगलः
ब्रह्मदंडविनिर्माताशतघ्नीशतपाशधृक् विश्वत्तेजस्पदाबीजंलिंगमाद्यस्तुनिर्मलः सदसद्व्यक्तमव्यक्तो
पितामातापितामहः स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपं निर्वाणंहृदयंचैवब्रह्मलोकःपरागतिः द

७३

यःसुवारः पश्चयाग्रयोदेवोग्रइनाबीणांगवः हंसवीणामहेः कोपकृद्दीनोजलाशयः उग्रवंशाकरो
वीरोवंशवादीह्यनिंदितः सर्वांगरूपोमायावीसुहृदोह्यनिलोनलः बंधनोबंधकर्त्ताचसुबंधनविमोच
नः सयज्ञारिःसकामारिर्महादंष्ट्रःसमायुधः बहुधानिंदितःसर्वशंकरोध्याप्यकोपनः अमरेशोमहादे।
वोविश्वदेवःसुरारिहा अहिर्बुध्न्योनिलाभश्चचेकितानोहविस्तथा अजैकपाच्चकापालीशंकुरजामहा
तिः धन्वंतरिर्धूमकेतुःस्कंदोवैश्रवणस्तथा धाताविष्णुश्चशक्रश्चमित्रस्त्वष्टाध्रुवोधरः प्रभावःसर्वगोवायु
रर्यमासविताभविः उषंगुश्चविधाताचमांधाताभूतभावनः नीरंतोर्थश्चभीमश्चसर्वकर्मगुणावहः पद्म
गर्भोमहागर्भश्चंद्रवक्त्रोनभोनघः फलवांश्चपुराणश्चपुण्यकृत्पुण्यकृत्तमः कुरुकर्त्ताकुरुवासीकुरुभू
तोमहौषधः सर्वाशयःसर्वचारीप्राणिनाःप्राणिनांपतिः देवदेवःसुखासक्तःसदसत्सर्वरत्नवित कैला
सस्थोगुहावासीहिमवद्गिरिसंश्रयः कूलहारीकूलकर्त्तानिश्चलःसविविभुः अयोध्यःसुप्रयोगस्सुपराग
ः प्राणधारणः धृतिमान्मतिमानदक्षःसत्कृतिश्चयुगाधिपतिः गोपालोगोपतिर्ग्रामोगोचर्मवसनोहरः हि
रण्यपालश्चतथागुहापालःप्रवेशनः महाम्नामहाकायोमहागिरिजितेंद्रियः संध्यानस्पसहरापश्चबहु
बीजोबहुप्रजः वणिजोवर्द्धनोनिर्यातःकुलश्चंदनश्छदः प्रानपात्रोमहाबलः वसुभूत्सर्वभूतात्मासर्वक
र्मपरोहरः महागीतोमहानृत्योह्यप्सरोगणसेवितः महाकेतुर्महाधातुर्नैकतानरतःस्मरः आवेदनीय।
आदेशःसर्वगन्धसुखावहः तोरणोपरणोपानाप्रवायनिवारकः संयोगोवर्द्धनोवृद्धोमहावृद्धोगणाधि

श्री॰
लिं॰ ग॰
पृ॰
८७

75

दःस्वप्नोदर्पणोथयमित्रवित् वेदकारः मंत्रकारो विद्वांसः परमर्दनः महामेघनिवासी च महाघोरो वशी
करः अग्निज्वालो अतिदीप्तो अतिधूम्रो हुतो हविः वृषणः शंकरो नित्यो वर्चस्वी धूमकेतनः नीलस्तथांग
लुब्धश्च शोभनो निरवग्रहः स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः उत्संगश्च महांगश्च महागर्भपरा
यणः कृष्णवर्णः सुवर्णश्च इंद्रियः सर्वदेहिनां महापादो महाहस्तो महाकायो महायशाः महामूर्द्धा म
हामात्रो महानेत्रो महाबलः महांतको महाकर्णो महोष्ठश्च महाहनुः महानासो महाकंबुर्महाग्रीवः श्म
शानभुक् महावक्षो महोरस्को ह्यंतरात्मा मृगालयः लंबितो लंबितोष्ठश्च महामायः पयोनिधिः महादंतो म
हादंष्ट्रो महाजिह्वो महामुखः महानखो महारोमा महाकेशो महाजटः प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाध
नः स्नेहनोस्नेहनश्चैव अजितश्च महामुनिः वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः मंडली मेघवाहश्च दे
वदानवदर्पहा अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः यजुःपादभुजो गुह्यः प्रकाशो जंगमस्तथैव च
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः उपहारप्रियः सर्वः कनकः कांचनस्थिरः नाभिर्नंदिकरो हर्म्यः पुष्क
रस्थपतिः स्थिरः द्वादशात्मा च सूक्ष्मो यज्ञो यज्ञसमाहितः नक्तो नीलः कलिः कामो मकरः कालपूजितः स
गणो गणकारो भूतवाहनसारथिः भस्मशायी भस्मगोप्ता भस्मभूतस्तरुर्गणः आगमश्च विलोपश्च महा
त्मा सर्वपूजितः शुक्लः स्त्रीशुक्लः संपन्नः शुचिर्भूतनिषेवितः आश्रमस्थः कपोतस्थो विश्वकर्मापतिर्वरः विशा
लशाखस्ताम्रोष्ठो हेमजालः सुनिश्चयः कपिलः कपिशः शुक्लश्चायुश्चैव परोपरः गंधर्वो ह्यदितिस्तार्क्ष्यो अविज्ञे

उग्रतेजो महातेजो जन्यो विजयकालवित् ज्योतिषांनयनः सिद्धिः संधिर्विग्रह एव च शंखीशिखीजटीज्वाली
विग्रहाग्रचराबली वेणवीपणवीवैवताली काकटंकटस्तथा सर्वहृत्पतिनारी च सर्वपापविमोचकः वंपत्
लनोद्रागांश्रयिसाद्रविनाशकः सामप्रवासी इन्द्रायः सर्ववायुनिषेवितः सकंदोयुविभागस्त्रतल्पा
यज्ञभागवित् सर्वावासः सर्वचारी दुर्वासा वासवो मतः भीमोभीमकरोयज्ञः सर्वपार्श्वयोनमः आकाशो
निर्विरूपश्च निर्वासा उरगः खगः भिक्षुश्च भिक्षुरूपश्च रौद्ररूपः सुरूपवान् वसुरेता सुवर्चस्वी वसुवेगो
महाबलः मनोवेगो निशाचारः सर्वलोकफलप्रदः सर्ववासः कृपावासः सपदेशः कचोत्कचः मुनि
रात्मामुनिर्लोकः सहस्रास्यः सहस्रभुक् पक्षी च पक्षिरूपश्च अतिदीप्तो विशांपतिः उन्मत्तो दुर्मदः क्रोधोमथा
र्थकरो मतः महासेनो विशाखश्च षष्टिभागो गवांपतिः शक्तिभाक् प्रतिष्ठश्च मोचस्तंभन एव च ऋता
हतकरः कालोमधुर्मधुकरो वृषः वानस्पत्यो वाजसेनो नित्यमाश्रमपूजितः ब्रह्मचारी लोकचारी सर्वचारी
सर्वचारविद् ईशान ईश्वरः कालो दिव्याचारश्चैनकधृक् निमित्तस्थो निमित्तश्च नंदीनंदीकरो हरिः नंदी
श्वरः सनंदी च नंदनो नंदिवर्धनः भगकारी निहंता च कालो ब्रह्मपितामहः चतुर्मुखो महालिंगश्चा
रुलिंगस्तथैव च लिंगाध्यक्षः सुराध्यक्षः कालाध्यक्षो युगावहः बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो ब
लः इतिहासः सकल्पश्च गौतमो हि जगदीश्वरः दंभो दंभवहो दंभो वैश्यो वशकरः कलिः लोककर्ता पशुपतिर्म
हाकर्ता ह्यपोषजः अक्षरं परमं ब्रह्म बलवान् शक्र एव च नितयाह्यनीशः शुद्धात्मा शुद्धो मान्यो गतागतः बहुप्रसा

सोमोनक्षत्रसाधकः चंद्रःसूर्यःशनिःकेतुर्ग्रहोग्रहपतिर्वमः अद्रिरद्यालयःकर्त्ता मृगवाणार्पणोनघः
महातपाघोरतपाअदीनोदीनसाधकः संवत्सरकरोमंत्रःप्रमाणंपरमंतपः योगीयोज्योमहाबीजोमहारे
तामहाबलः सुवर्णरेताःसर्वज्ञःसुवीजोवृषवाहनः दशबाहुस्त्वनिमिषोनीलकंठउमापतिः विश्वरू
पःस्वयंश्रेष्ठोवलवीरोवलोगणः गणकर्त्तागणपतिर्दिग्वासाःकामएवच मंत्रवित्परमोमंत्रःसर्वभाव
करोहरः कमंडलुधरोधन्वीवाणहस्तःकपालवान् अशनीशतघ्नीखड्गीचपट्टिशीचायुधीमहान् श्रुवहस्त
सुरूपश्चतेजस्तेजकरोनिधिः उष्णीषीचसुवक्त्रश्चउदग्रोविनतस्तथा दीर्घश्चहरिकेशश्चसुतीर्थःकृष्ण
एवच शृगालःसर्वसर्वार्थोमुंडःसर्वशुभंकरः सिंहशार्दूलरूपश्चगंधारीचकपर्द्यपि ऊर्ध्वरेताऊर्ध्वलिं
गोऊर्ध्वशायीनभस्तलः त्रिजटश्चीरवासाश्चरुद्रःसेनापतिर्विभुः अहोरात्रश्चनक्तश्चतिग्ममन्युःसुवर्च
सः गजहादैत्यहाकालोलोकधातागुणाकरः सिंहशार्दूलरूपाणामाद्रचर्मसदंवरः निशाचरःप्रेतचा
रीभूतचारीमहेश्वरः बहुभूतोबहुधनःसर्वभार्योमृतोहरः नृत्यप्रियोनित्यनर्त्तोनर्त्तकःसर्वलातकः
घोरोमहातपाःपाशोनित्योगिरिविरोचनः सहस्रहस्तोविजयोध्रुवसायोह्यनोदितः अमर्षणोमर्षणात्मा
यज्ञहाकामशासनः दक्षयज्ञपहारीचसुसहामध्यमस्तथा तेजोपहारीवलवानवंदितोभ्यर्थितोवुधः
गंभीरघोषोगंभीरोगंभीरवलवाहनः न्यग्रोधरूपोन्यग्रोधोविश्वकर्माचविश्वभुक् तीक्ष्णोपायश्चहर्यश्च
सहायःकर्मकालवित् विष्णुःप्रसादितोयज्ञःसमुद्रोवडवामुखः हुताशनःसहायश्चप्रशांतात्माहुताशनः

योसौ वै लोकविजये द्विजाः एष दाक्षो नारायणस्य हयास्यस्तस्य चात्मजः हयास्यात्तु दृष्ठवंशो जज्ञे वसुमना
नृपः तस्य पुत्रोभवद्राजा विपन्नाभक्षभावितः प्रसादाद्ब्रह्मसूनोर्वै मंडितः आप्यापि षष्ठीते प्रश्नमेप महाह
स्यफलं प्राप्य तद्राज्यं या भानेश्वरमंत्रप्राप्तो भवभक्तः प्रतापवान् कथं हि वाश्वमेधं करामीति विचिंत्य
न यतहीनः सधर्मात्मा दृष्टवान्ब्रह्मणः सुत तंडिसंज्ञं द्विजात्तस्माल्लब्धवान्द्विजसत्तमः नाम्नां सहस्रं रु
द्रस्य ब्रह्मणा कथितं पुरा तेन नाम्नां सहस्रेण स्तुत्वा तंडिर्महेश्वरं गाणपत्यं लब्धवान्स ब्रह्मयोनिर्द्विजो
त्तमः ततस्तस्मात्तु पोलब्धा तंडिना कथितं पुरा नाम्नां सहस्रं तज्जप्त्वा गाणपत्यमवाप्तवान् स्तूषयकद्रुः
नाम्नां सहस्रं रुद्रस्य तंडिना ब्रह्मयोनिना कथितं सर्ववेदार्थसंचितं तद्धि सुव्रत नाम्नां सहस्रं विप्राणां व
न्दे महेशं शोभनं मम सूत उवाच सर्वभूतात्मभूतस्य हरस्यामिततेजसः अष्टोत्तरसहस्रं तु नाम्नां शृणुत सु
व्रताः एवं कृत्वा मानवः श्राद्धं याति गाणपत्यं परम् स्थिरः स्थाणुः प्रभुर्भानुः प्रवरो वरदो वरः सर्वा
त्मा सर्वविख्यातः सर्वः सर्वकरो भवः जटी दंडी शिखंडी च सर्वगः सर्वभावनः हरिश्च हरिणाक्षश्च सर्व
भूतहरः प्रभुः प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः श्मशानचारी भगवान्खचरो गोचरोर्दनः अभि
वाद्यो महाकर्मा तपस्वी भूतधारणः उन्मत्तवेषः प्रच्छन्नः सर्वलोकप्रजापतिः महारूपो महाकायो महा
वेषो महायशाः महात्मा सर्वभूतश्च विश्वरूपो पाथमर्दनः लोकपालोन्तर्हितात्मा प्रसादो भयदो विभुः।
पवित्रश्च महांश्चैव नियमो नियमाश्रितः स्वयंभूतः सर्वकर्मा आदिरादिकरो निधिः सहस्राक्षो विशालाक्षो

त्कलस्योत्कलेराज्ञेविनताश्वस्यपश्चिमे गयागयस्यचाख्यातागयोपरमशोभना सुतानांतेस्थितिर्यथासंपि
तृणांचसदास्थितिः इक्ष्वाकोर्ज्येष्ठदायादोमध्यदेशमवाप्तवान् कन्याभावाच्चसुद्युम्नोनैवभागमवाप्तवा
न्वसिष्ठवचनात्त्वासीत्प्रतिष्ठानेमहाद्युतिः प्रतिष्ठायमेराज्यंसतस्युद्युम्नस्यमहात्मनः सपुरूरवसेप्रादाद्राज
प्राप्यमहायशाः मानवेयोमहाभागःस्त्रीपुंसोर्लक्षणान्वितः इक्ष्वाकोरभवद्वीरोविकुक्षिर्निडेसंविन्नमः ज्येष्ठः
पुत्रशतस्यासीद्दशपंचचतन्सुताः अश्मस्तज्येष्ठःककुत्स्थस्तत्समसदस्युस्ततोनृपः ततःपृथुर्मनिश्रेष्ठोविश्व
कःपार्थिवस्ततः विश्वकस्यार्द्रकोधीमान्युवनाश्वस्तुतत्सुतः श्रावस्तिश्चमहातेजावंशकस्तत्सुतोभवत्
श्रावस्तेर्निर्मितायेनगौडदेशेपुरीशुभा श्रावस्तस्यायुवनाश्वस्यहृदश्वोभवत्ततः बृहदश्वात्ततोयज्ञकुवला
श्वःस्मृतस्ततः धुंधुमारत्वमापन्नोहत्वाधुंधुंमहाबल धुंधुमारस्यतनयास्त्रयस्तेलोकविश्रुताः दृढाश्वश्च
चंडाश्वःकपिलाश्वस्तुतेस्मृताः दृढाश्वस्यप्रमोदस्तुहर्यश्वस्तस्यविश्रुतः हर्यश्वस्यनिकुंभस्तुसंहता
श्वस्ततस्ततः कृशाश्वोथरणाश्वश्चसंहताश्वस्यात्मजावुभौ युवनाश्वोरणाश्वस्यमांधातातस्यवैसुतः मांधा
तुःपुरुकुत्सोभूदंबरीषश्चवीर्यवान् मुचुकुंदश्चपुण्यात्मात्रयस्तेलोकविश्रुताः अंबरीषस्यदायादोयुवना
श्वोपरःस्मृतः हारीतोयुवनाश्वस्यहारीतास्तत्सुताःस्मृताः एतेह्यंगिरसःपक्षेक्षत्रोपेताद्विजातयः पुरुकुत्स्य
स्यदायादस्त्रसदस्युर्महायशाः नर्मदायामथोत्पन्नःसंभूतिस्तस्यचात्मजः विष्णुवृद्धस्ततस्तस्यविष्णुवृद्धाइ
तिस्मृताः एतेह्यंगिरसःपक्षेक्षत्रोपेताःसमाःस्मृताः संभूतिरपरंपुत्रमनरण्यमजीजनत् रावणेनहतो

यन्महादेवं तत्वा वर्षायुतायुतं भवप्रसादात्प्रगमल्लोकपालत्वमुत्तमं पितृणामाधिपत्यं च शापमोक्षं त
थैव च लब्धवान्देवदेवस्य प्रभावात्शूलपाणिनः असहन्ती पुरा भानोस्तेजोमयमनिन्दिता रूपं तापीस्व
देहात्तु छायायां मात्वकल्पयत् वडवारूपमास्थाय तपस्तेपे स्वयं वशा कालान्तरयत्ततो नाम्ना छायायांका
यापतिः प्रभुः वडवामृगमत्संज्ञामश्वरूपेण भास्करः वडवा च तदा व्यश्वी मज्जात तस्माद्दिवाकरात् सृष्टवेवा
श्विनौ देवौ देवानां तौ भिषग्वरौ ततस्तां लिखितो भास्करः पश्चात्संज्ञापिता महात्मना विलासश्च कृतस्तत्ते
जोरमण्डलात् भास्करस्य तत् निर्ममे भगवांस्त्वष्टा प्रधानं दिव्यमायुधं रुद्रप्रसादाच्च शुभं सुदर्शनमिति स्मृ
तम् लब्धवान्भगवांश्च कृष्णः कालात्तु लक्ष्मम् मनोस्तु प्रथमस्यासन् नवपुत्रास्तु तत्तानव इक्ष्वाकुर्ना
भगश्चैव धृष्णुः शर्यातिरेव च नरिष्यन्तश्च वै धीमान्नाभागोऽरिष्ट एव च करुषश्च पृषध्रश्च नवैते मानवाः स्मृ
ताः इला ज्येष्ठा वरिष्ठा च पुंस्त्वं प्राप्ता हि सा भवात् सुद्युम्न इति विख्याता पुंस्त्वं प्राप्ता इला पुरा मित्रावरुणयो
स्तु प्रसादात्मुनिपुंगवाः पुनः शरवणं प्राप्य स्त्रीत्वं प्राप्ता भवात्तया सुद्युम्नो मानवः श्रीमान् सोमवंशवि
वर्द्धये इक्ष्वाकोरश्वमेधेन इला किंपुरुषोऽभवत् इला किंपुरुषत्वे च सुद्युम्न इति चोच्यते मासमेकं पुमा
न्वीरः स्त्रीत्वं मासमगात्पुनः इला बुधस्य भवनं सोमपुत्रस्य चाश्रिता बुधेनान्तरमासाद्य मैथुनायोपमन्त्रि
ता सोमपुत्राद्बुधाच्चापि ऐलो जातः पुरूरवाः सोमवंशाग्रजो धीमान्स्वभक्तः श्रुतापवान् इक्ष्वाकुरूर्ध्ववंशस्य
तथैवान्ते यजात्तपः पुत्रत्रयमभूत्तस्य सुद्युम्नस्य द्विजोत्तमाः उत्कलश्च गयश्चैव विनताश्वस्तथैव च ३

माहेश्वरं योगं रुद्रलोकं गता हि ते त्रयोदशे पुनः प्राप्ते परिवर्ते क्रमेण तु धर्मीनारायणो॰
नारायणो नाम व्यासस्तु भविता यदा तदाप्यहं भविष्यामि वालिर्नाम महामुनिः वालखि
ल्याश्रमे पुण्ये पर्वते गंधमादने तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः सुधामा काश्यप
श्चैव वसिष्ठो विरजस्तथा महायोगबलोपेता विमला ऊर्ध्वरेतसः प्राप्य माहेश्वरं योगं रुद्रलो
कं गता हि ते यदा व्यासस्तरक्षुस्तु पर्याये च चतुर्दशे तत्रापि पुनरेवाहं भविष्यामि द्विजाति
के वंशे त्वंगिरसां श्रेष्ठे गौतमो नाम नामतः भविष्यामि महापुण्यं गौतमं नाम तद्वनं तत्रा
पि मम ते पुत्रा भविष्यन्ति कलौ तदा अत्रिरुग्रश्रवाश्चैव श्रवणोथ श्रविष्टकः योगात्मानो॰
महात्मानः सर्वयोगसमन्विताः प्राप्य माहेश्वरं योगं रुद्रलोकं गता हि ते ततः पंचदशे
प्राप्ते परिवर्ते क्रमागते त्रय्यारुणिर्यदा व्यासो द्वापरे समपद्यत तदाप्यहं भविष्यामि नाम्ना
वेदशिरा मुनिः तत्र वेदशिरा नाम अस्त्रं तत्पारमेश्वरं भविष्यति महावीर्यं वेदशीर्षश्च पर्वतः॰
हिमवत्पृष्ठमासाद्य सरस्वतीं नगोत्तमे तत्रापि मम ते पुत्रा भविष्यन्ति तपोधनाः कुणिश्च कुणि
बाहुश्च कुशरीरः कुनेत्रकः योगात्मानो महात्मानः सर्वे ते ऊर्ध्वरेतसः प्राप्य माहेश्वरं
योगं रुद्रलोकमितो गताः व्यासो युगे षोडशे तु यदा देवो भविष्यति तत्र प्रसन्नाय भक्तानां विजि॰
तात्मना तदाप्यहं भविष्यामि गोकर्णो नाम नामतः भविष्यति सुपुण्यं तु गोकर्णं नाम तद्वनं॰

तत्रापि मम ते पुत्रा भविष्यंति हि योगिनः कश्यपो ह्युशनाश्चैव च्यवनोथ बृहस्पतिः तेपि तेनै
व मार्गेण ध्यानयोगसमन्विताः प्राप्य माहेश्वरं योगं गंतारो रुद्रमेव हि ततः सप्तदशे चैव परि
वर्ते क्रमागते यदा भविष्यति व्यासो नाम्ना देवः कृतंजयः तदाप्यहं भविष्यामि गुहावासीति
नामतः हिमवच्छिखरे रम्ये महाडंगे महालये सिद्धक्षेत्रं महापुण्यं भविष्यति महालयं त
त्रापि मम ते शिष्या योगात्मा ब्रह्मवादिनः भविष्यंति महात्मानो निर्ममा निरहंकृताः रामणोवा
मदेवश्च महाकायो महानिलः तेषां दशसहस्रं तु शिष्याणां ध्यानयोगिनां भविष्यंति तदा क
ले पर्वते ध्यानपुंजकाः योगाभ्यासरतास्तु वै हृदि कृत्वा महेश्वरं महालयपदं न्यस्तं दृष्ट्वा या
ति शिवं पदं ये चान्येपि महात्मानः कलौ तस्मिन् युगांतिके ध्यानेन मनः समाधाय विमलाः शुद्ध
बुद्धयः गत्वा महालयं पुण्यं दृष्ट्वा माहेश्वरं पदं तारयित्वा रयते जंतु दश पूर्वान् दशापरान् आ
त्मानमेकविंशं तु तारयित्वा महालये मम प्रसादाद्यास्यंति रुद्रलोकं गतज्वराः ततोष्टादशमे
चैव परिवर्ते यदा विभो तदा ऋतंजयो नाम व्यासस्तु भविता मुनिः तदाप्यहं भविष्यामि शिख
डी नाम नामतः सिद्धक्षेत्रे महापुण्ये देवदानवपूजिते हिमवच्छिखरे रम्ये शिखंडी नाम पर्व
तः शिखंडिनो वनं चापि यत्र सिद्धनिषेवितं तत्रापि मम ते पुत्रा भविष्यंति तपोधनाः वाचश्र
वाः सवाकश्च श्यावाश्वश्च ह्यथीश्वरः योगात्मानो महात्मानः सर्वे ते वेदपारगाः प्राप्य माहेश्व

83

रंयोगं रुद्रलोकाय संस्थिताः अथैकोनविंशे तु परिवर्ते क्रमागते व्यासस्तु भविता नाम्ना भा
रद्वाजो यदा मुनिः तदाप्यहं भविष्यामि जटामालीति नामतः हिमवच्छिखरे रम्ये जटायुर्यत्र
पर्वतः तत्रापि मम ते पुत्रा भविष्यंति महौजसः हिरण्यनाभः कौशल्यो लोकाक्षिः कुथुमिस्त
था ईश्वरा योगधर्माणः सर्वे ते ह्यूर्ध्वरेतसः प्राप्य माहेश्वरं योगं महेश्वरपदे स्थिताः ततो
विंशतमश्चैव परिवर्ते यदा तदा गौतमस्तु यदा व्यासो भविष्यति तदा मुनिः तदाप्यहं भवि
ष्यामि अट्टहासस्तु नामतः अट्टहासप्रियाश्चैव भविष्यंति तदा नराः तदा हिमवतः पृष्ठ
ट्टहासो महागिरिः देवदानवयक्षेन्द्रसिद्धचारणसेविते तत्रापि मम ते पुत्रा भविष्यंति म
हौजसः योगात्मानो महात्मानो ध्यानिनो नियतव्रताः सुमन्तुर्बर्बरिर्विद्वान्कबंधः कुशंधरः
प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः एकविंशे ततः प्राप्ते परिवर्ते क्रमागते वाचःश्रवाः स्मृतो
व्यासो यदा सप्तर्षिसत्तमः तदाप्यहं भविष्यामि दारुको नाम नामतः तस्माद्भविष्यते पुण्यं देवदारु
वनं तदा तत्रापि मम ते पुत्रा भविष्यंति महौजसः प्लक्षो दार्भायणिश्चैव केतुमान्गौतमस्तथा
योगात्मानो महात्मानो महात्मानो नियमाद्धर्ध्वरेतसः नैष्ठिकं व्रतमास्थाय रुद्रलोकाय ते गताः
द्वाविंशे परिवर्ते तु व्यासः शुष्मायणो यदा तदाप्यहं भविष्यामि वाराणस्यां महाद्युतिः नाम्ना वै ला
ङ्गली भीमो देवा यत्र सवासवाः द्रक्ष्यंति मां कलौ तस्मिन्नवतीर्णं हलायुधं तत्रापि मम ते पुत्रा भवि

लिं॰
गञ॰
५२

ष्यंतिसुधार्मिकाः भल्लाविर्मधुपिंगश्च श्वेतकेतुः कृतस्तथा तेपिमाहेश्वरंयोगंप्राप्यध्या
नपरायणाः विमलाब्रह्मभूयिष्ठा रुद्रलोकाय संस्थिताः परिवर्त्तेत्रयोविंशेतृणाविंदुर्यदा
मुनिः व्यासोहि भविताब्रह्मन् तदाहं भविताषुनः श्वेतोनाममहाकायोमुनिपुत्रःसुधार्मिकः
तत्रापिममतेपुत्राभविष्यंतितपस्विनः उषजोवृहदश्वश्चदेवलःकविरेवच प्राप्यमाहेश्वरं
योगंरुद्रलोकायतेगताः परिवर्तेचतुर्विंशेऋक्षोनामयदाविभोः तदाप्यहंभविष्यामिकलौ
तस्मिंयुगांतिके शूलीनाममहायोगीनैमिषेदेववंदिते तत्रापिममतेपुत्राभविष्यंतितपोधनाः
शालिहोत्रोग्निवेशश्चयुवनाश्वःशरद्वसुः तेपितेनैवमार्गेण रुद्रलोकायसंस्थिताः पंचविं
शतिमेप्राप्तेपरिवर्तेक्रमागते वासिष्टस्तुयदाव्यासः शक्तिनामाभविष्यति तदाप्यहंभविष्या
मिदंडिमुंडीश्वरःप्रभुः तत्रापिममतेपुत्राःभविष्यंतितपोधनाः छागलःकुंडःकर्णाश्चकुंभ
श्चैवप्रवाहकः प्राप्यमाहेश्वरंयोगंरुद्रलोकायतेगताः षड्विंशेपरिवर्ते तु यदाव्यासःपराशरः
तदाचाहंभविष्यामिसहिष्णुर्नामनामतः पुरंभद्रवटंप्राप्यकलौतस्मिंयुगांतिके तत्रापिममते
पुत्राभविष्यंतिसुधार्मिकाः उलूकोविद्युतश्चैवशंबुकश्चाश्वलायनः प्राप्यमाहेश्वरंयोगममृ
तत्वायतेगताः सप्तविंशेततःप्राप्तेपरिवर्तेक्रमागते जातूकर्ण्योयदाव्यासोभविष्यतितपो
धनः तदाचाहंभविष्यामिसोमशर्माद्विजोत्तमः प्रभासतीर्थमासाद्ययोगात्मायोगवित्तमः

तत्रापि मम ते शिष्या भविष्यंति तपोधनाः अक्षपादः कणादश्च उलूको वत्स एव च योगा-
त्मानो महात्मानो विमला शुद्धबुद्धयः प्राप्य माहेश्वरं योगं रुद्रलोकाय ते गताः अष्टाविंश-
तः प्राप्ते परिवर्तक्रमागते पराशरसुतः श्रीमान् विष्णुर्लोकपितामहः यदा भविष्यति व्या-
सो नाम्ना द्वैपायनः प्रभुः तदा षष्ठेन चांशेन कृष्णः पुरुषसत्तमः वसुदेवाद्यदुश्रेष्ठो वासु-
देवो भविष्यति तदाप्यहं भविष्यामि योगात्मा योगमायया लोकविस्मयनार्थाय ब्रह्मचारि-
शरीरकः श्मशाने मृतमुत्सृष्टं दृष्ट्वा कायमनाथकं ब्राह्मणानां हितार्थाय प्रविष्टो योगमायया
दिव्यां मेरुगुहां पुण्यां त्वया सार्द्धं च विष्णुना भविष्यामि तदा ब्रह्मन् लकुली नाम नामतः काया-
वतारमित्येवं सिद्धक्षेत्रं च वै तदा भविष्यति तदा ख्यातं यावद्भूमिर्धरिष्यति तत्रापि मम ते शि-
ष्या भविष्यंति तपस्विनः कुशिकश्चैव गर्गश्च मित्रः कौरुष्य एव च योगात्मानो जितात्मानो
ब्राह्मणा वेदपारगाः प्राप्य माहेश्वरं योगं विमला ह्यूर्ध्वरेतसः रुद्रलोकं गमिष्यंति पुनरावृ-
त्तिदुर्लभं एते पाशुपताः सिद्धा भस्मोद्धूलितविग्रहाः लिंगार्चनरता नित्यं बाह्याभ्यंतरसंस्थि-
ताः भक्त्या मयि च योगेन ध्याननिष्ठा जितेन्द्रियाः इत्येतन्मया व्यक्तं मन्वन्तरेषु लक्षणं मन्वा-
दि कृष्णपर्यन्तमष्टाविंशद्युगक्रमात् तत्र श्रुतिसमूहानां विभागो धर्मलक्षणः भविष्यति त-
दा काले कृष्णद्वैपायनो यदा सूत उवाच निशम्यैवं महातेजा महादेवेन कीर्तितं रुद्रावतारं भग-

वान्प्रणीपत्यमहेश्वरं तष्टावयामिभरिष्टाभिः पुनः प्राह च शंकरं ब्रह्मोवाच सर्वैविलम
याद्देवाः सर्वे विल्लपरायणाः नहिविल्लसमाकाचिद्भूतिरन्याविधीयते इत्येवं सततं वेदाः
गायंते नात्र संशयः सदेवदेवो भगवान् तव लिंगार्चनेरतः तवमण्णामपरमः कथं देवो
ह्यभूत्प्रभुः सूत उवाच निशम्य वचनं तस्य ब्रह्मणः परमेष्ठिनः अपिबन्निव नेत्राभ्यां तमालो
क्याह शंकरः भवान्नारायणश्चैव शक्रसाक्षान्महेश्वरः मुनयश्च सदा लिंगं संपूज्य विधिपूर्व
कं स्वस्वपदे विभोः प्राप्तास्तस्मात्सपूजयंति ते लिंगार्चनेन विना निष्ठा नास्ति यस्माज्जनार्दने
आत्मनो यजनेनित्यं श्रद्धया भगवान्प्रभुः इत्येवमुक्त्वा भगवान् अनुग्रह्य महेश्वरः पुनः सं
प्रेक्ष्य देवं शक्रं देवोंतरधीयत तमुद्दिश्य तदा ब्रह्मा नमस्कृत्य कृतांजलिः स्वं स्वं वेषं गत
वान् लब्धसंतस्तु शंकरात् इति लिंगपुराणे रुद्रावताराः देवशिष्यानिर्देशात्रिंशोध्यायः २४
ऋषय ऊचुः कथं प्रोक्तो महादेवः कैलासेनानगात्मजा एकस्या महादेवेशो लिंगार्चनविधि
क्रमं तदा पार्श्वस्थितोनंदी शालंकायनजन्मनः श्रुत्वा विल पुनः प्राह ब्रह्मपुत्राय सुव्रत स
नत्कुमाराय शुभं लिंगार्चनविधिक्रमं तस्माद्व्यासो महातेजाः श्रुतवान् श्रुतिसंमितं स्नातया
गोपचाराणि यथा शैलादिनो श्रुतवान् श्रुतवांस्तत्प्रवक्ष्यामि स्नानाद्यं चार्चनाविधिं शैलादिरुवा
च अथ स्नानविधिं वक्ष्ये ब्रह्मणानाहिताय वै श्रुतवांस्तत्प्रवक्ष्यामि स्नानाद्यं चार्चनाविधिं सर्व

स्थूलः सुसंभृतः कालाग्निपीठमध्यस्थः स्वयंशिवोऽस्त्रनारशोः पातालावीरमघोरे शंद्दा॥
त्रिंशान्नरसंयुते विभीनकेनवैकलाषोडशाशलमानतः पीठंन्यस्यनृपेंद्रस्य शत्रुमं॥
गारकेनतु कुंडस्याधः स्वनेत्रेनशाल्मलाः कोपमूर्छितः अधोमत्स्याधिपादंतसर्वज्ञं३७
यत्नतः श्मशानांगारमानीयतुषेणसह दाहयेत् तत्राग्निस्थापयेद्धीमान्वकस्यपरा
युणः मयूरास्त्रेणनामान्तज्वलनदेयप्यत्नतः केवकंतुषसंयुकैः कर्पासास्थिसमा॥
न्विते: एकसर्षपत्रंमिश्रैर्होमद्रव्यैर्विशेषतः हुत्वायंत्रोद्भवैस्त्रैवसहहोमंतुकारयेत्
अष्टोत्तरसहस्रंतुहोमयेद्दन्नुपूर्वशः हुत्वापदेचतुर्दशपासमाराध्ययथाक्रमंअष्टमा
नंतथांगारे मंडलेस्थानवर्जिते एवंकृतेनृपेंद्रस्यशत्रवःकुलजैःसह सर्वदःखसमो
पेतम्प्रयांतियमसाधने मंत्रेणानेनवादायनुकपालनखेनवा केशेनूणानथांगारंतु
षकंचुकमेवच वीरघ्नादारजोभूलिंगृहसमाजनादिच विषसर्पस्यदंतानिअश्वद
तानिखरवता: दजेरस्यवदंतानिवृषदंतानियानिच गवांचैवचतुर्दंतावृषदंतानिया
निचु गवांचैवबलर्दंताव्याघ्रदंतानियानितु तथाहस्तिमृगाणांचविडालस्यतथैव
च नकुलस्यचदंतानिवराहस्यविशेषतः दंतानिसाधयित्वाचमंत्रेणानेनयत्नतः
जपेदष्टोत्तरशतंमंत्रंचाघोरमुत्तमं तत्कपालंखनेच्छत्रोर्गृहवानगरेपिवा प्रेतस्य

लिं॰
पु॰
२८८

88

नेपि राहुर्वा मृतवह्नेणवेष्टितं ग्रहोरष्टमगयोवाथ विहंचदिवाकरे सोमेवापिप्रवि
ष्टेतु मंत्रेणानेनयत्नतः स्यान्नमाशं भवेत्तस्य शत्रोर्नीशस्तुजायते शत्रुराज्ञः समा
लिख्यगामनेमन्तुपाश्यिते भूतलेदर्पणाग्रेथवितानपरिशोभिते चतुस्तोरणसंयु
क्तेदर्भमालासमावृते वेदाध्ययनसंपन्नो राहुबुद्धिप्रकाशकं दत्तिणेनतुपादेन
मूर्द्धि संताडयेत्तथा एवंकृतेनृपेंद्रस्य शत्रुनाशोभविष्यति स्वराष्ट्रपतिमुद्दिश्य
यः कुर्यादभिचारकं सआत्मानं निहंत्येव स्वकुलंनाशयेत्कुधीः तस्मात्स्वराष्ट्रगोप्ता
हं नृपतिंपालयेत्सुधीः मूर्खोवापि क्रियायेषु सर्वयत्नेन सर्वदा एतद्रहस्यंकथितंनदे
यं यस्यकस्यचित् इत्यादिमहापुराणे लैंगे अघोरमंत्रमाहात्म्ये अभिचारविधौ ८५
ऋषय ऊचुः निग्रहो योवनृपोयं कथितः सूत सुव्रत वज्रवाहनिकामद्य वक्तुमर्ह
सि शोभना सूत उवाच वज्रवाहनिकानाम विद्या शत्रुभयंकरी अनयासेवयावज्रं
नृपाणां स्थापयेत्ततः वज्रंकृत्वा विधानेन तदस्त्रमभिषिंच्य अनया विद्ययाकांस्यं
विन्यस्तं काचनेनव ततस्नात्वा रलतं वज्रयेद्विद्वान्समाहितः वज्रीदशांशं हुत्वा
हव्यकुंडेचनादिभिः तद्वज्रं गोमयेनैव संदापयेन्नृपतेस्तदा तेनवज्रेणवेगच्छन्त्वश
त्रून जीयाद्रणाजिरे पुरापितामहेनैषालब्धाविद्याप्रयत्नतः देवीशक्रोपकारार्थं

वन्दे लिंगं स्मराम्यहं शब्दब्रह्मतनुं साक्षाच्छब्दब्रह्मप्रकाशकं १५ वर्णावयवमव्यक्तं बहुधा गु-
णसंस्थितं अकारोकारमकारं च स्थूलं सूक्ष्मं परावरं ॐकाररूपमृग्वक्त्रं सामजिह्वासमन्वि-
तं यजुर्वेदमहाग्रीवमथर्वहृदयं विभुं १६ प्रधानपुरुषातीतं प्रलयोत्पत्तिवर्जितं तमसा-
कालरुद्राख्यं रजसा कर्मकारकं सत्त्वेन सर्वगं विष्णुं निर्गुणं परमेश्वरं प्रधानावयवं व्याप्य
सप्तधाधिष्ठितं क्रमात् पुनः षोडशधा चैव षड्विंशकमजोद्भवं सर्गप्रतिष्ठासंहारलीला-
र्थं लिंगरूपिणं प्रणम्य च यथान्यायं वक्ष्ये लिंगोद्भवं शुभं २० इतिश्रीमहापुराणे लैंगे कल्पे प्र-
थमोध्यायः १ सूत उवाच ईशानकल्पवृत्तांतमधिकृत्य महात्मना ब्रह्मणा कथितं पूर्वं
पुराणं लिंगमुत्तमं ग्रंथकोटिप्रमाणं तु शतकोटिप्रविस्तरे चतुर्लक्षेण संक्षिप्ते व्यासैः सर्वां-
तरेषु वै व्यस्तेऽष्टादशधा चैव ब्रह्माद्यैर्द्वापरादिषु लिंगमेकादशं प्रोक्तं मया व्यासाच्छ्रुतं च त-
त् ग्रंथैकादशसाहस्रं ग्रंथमानमिह द्विजाः तस्मात्संक्षेपतो वक्ष्ये कृत्स्नं विस्तरतो मया
चतुर्लक्षेण संक्षिप्ते कृष्णद्वैपायनेन तु यथैकादशसाहस्रैः कथितो लिंगसंभवः सर्गः
प्राधानिकः पश्चात्प्राकृतो वैकृतस्तथा अंडस्यास्य च संभूतिरंडस्यावरणाष्टकं अंडोद्भवत्वं
सर्वस्य रजोगुणसमाश्रयात् विष्णुत्वं कालरुद्रत्वं शयनं चाप्सु तस्य वै प्रजापतीनां सर्ग-
स्तुष्टिश्चोद्धरणं तथा ब्रह्मणश्च दिवारात्रमायुर्वर्षाग्रतः पुनः सवनं ब्रह्मणश्चैव युग

कल्पश्च न स्मृतः दिव्यं च मानुषं वर्षमार्षं ध्रौवं तथैव च पित्र्यं पितॄणां संभूतिर्धर्मस्याश्रमिणां
तथा प्रवृत्तिर्जगतां भूयो देव्याः शरीरतः रुद्रवक्त्रस्य तथा स्त्रीपुंभावे विरिंचेस्तु सर्गो मैथुनसंभवः श्री
ल्याष्टकं हि रुद्राय कथितं सोदकान्तरे ब्रह्मविष्णोर्विवादश्च पुनर्वो लिंगस्य संभवः शिलादस्य
तपश्चैव वृत्रादेर्दर्शनं तथा प्रार्थनायो निजस्याथ दुर्लभत्वं हि नस्मृतः शिलादशक्रसंवादः
पुत्रस्यायोनित्वमेव च भवस्य दर्शनं चैव तिष्यस्याचार्यशिष्ययोः आसावतारास्तु सदा कल्पम
न्वंतराणि च कल्पांतं चैव कल्पानां मायाभेदस्त्वनुक्रमात् कल्पे कल्पे वाराहे वाराहत्वं ह
रेस्तथा मेघवाहनकल्पस्य वृत्तांतं रुद्रगौरवं पुनर्लिंगोद्भवश्चैव ऋषिमध्ये पिनाकिनः लिं
गस्याराधनं स्नानं विधानं शौचलक्षणं वाराणस्याश्च माहात्म्यं क्षेत्रमाहात्म्यवर्णनं भुविरु
द्रालयानां तु संख्या विस्तारं [illegible] हस्य च अंतरिक्षे तथा [illegible] लिंगे देवापत्तनवर्णनं दक्षस्य पतनं भ
मो पुनः स्वारोचिषेंतरे दक्षशापश्च दक्षस्य शापमाहात्म्यमेव च कैलासवर्णनं चैव योगः
योगः पाशुपतस्तथा चतुर्युगप्रमाणं तु युगधर्मः सविस्तरः संध्यांशकप्रमाणं च संध्याव
तं भवस्य च श्मशाननिलयं चैव चंद्रलेखासमुद्भवः उद्वाहः शंकरस्याथ पुत्रोत्पादनमेव च
मैथुनादिप्रसंगेन विनाशे जगतां भयं शापः संतापकृतो देवानां रांविसुं च पावकं गंगोत्सर्ग
स्तु रुद्रस्य गांगेयोद्भवपव च ग्रहणादिषु कालेषु स्थाप्य लिंगफलं तथा द्रुपदपीविविवाद